# .. shrIbAlarakShA ..

# ॥ શ્રીબાલરક્ષા ॥

## Document Information

Text title : gopIkRitabAlarakShA
File name : bAlarakShA.itx
Category : raksha
Location : doc_vishhnu
Author : Maharshi Vyas in Bhagavat Purana
Language : Sanskrit
Subject : philosophy/hinduism/religion
Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com, NA
Description-comments : From Bhagavatapurana, 10.06.22-29
Latest update : July 29, 2012
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીબાલરક્ષા ॥

શ્રી ગણેશાય નમઃ ।
અવ્યાદજોઽઙ્ઘ્રિ મણિમાંસ્તવ જાન્વથોરૂ
યજ્ઞોઽચ્યુતઃ કટિતટં જઠરં હયાસ્યઃ ।
હૃત્કેશવસ્ત્વદુર ઈશ ઇનસ્તુ કણ્ઠં
વિષ્ણુર્ભુજં મુખમુરુક્રમ ઈશ્વરઃ કમ્ ॥ ૧॥

ચક્ર્યગ્રતઃ સહગદો હરિરસ્તુ પશ્ચાત્
ત્વત્પાર્શ્વયોર્ધનુરસી મધુહાજનશ્ચ ।
કોણેષુ શઙ્ખ ઉરુગાય ઉપર્યુપેન્દ્રસ્
તાર્ક્ષ્યઃ ક્ષિતૌ હલધરઃ પુરુષઃ સમન્તાત્ ॥ ૨॥

ઇન્દ્રિયાણિ હૃષીકેશઃ પ્રાણાન્નારાયણોઽવતુ ।
શ્વેતદ્વીપપતિશ્ચિત્તં મનો યોગેશ્વરોઽવતુ ॥ ૩ ॥

પૃશ્નિગર્ભસ્તુ તે બુદ્ધિમાત્માનં ભગવાન્પરઃ । var ગર્ભશ્ચ તે
ક્રીડન્તં પાતુ ગોવિન્દઃ શયાનં પાતુ માધવઃ ॥ ૪॥ var કેશવઃ
વ્રજન્તમવ્યાદ્વૈકુણ્ઠ આસીનં ત્વાં શ્રિયઃ પતિઃ ।
ભુઞ્જાનં યજ્ઞભુક્પાતુ સર્વગ્રહભયઙ્કરઃ ॥ ૫॥

ડાકિન્યો યાતુધાન્યશ્ચ કુષ્માણ્ડા યેઽર્ભકગ્રહાઃ ।
ભૂતપ્રેતપિશાચાશ્ચ યક્ષરક્ષોવિનાયકાઃ ॥ ૬॥

કોટરા રેવતી જ્યેષ્ઠા પૂતના માતૃકાદયઃ ।
ઉન્માદા યે હ્યપસ્મારા દેહપ્રાણેન્દ્રિયદ્રુહઃ ॥ ૭॥

સ્વપ્નદૃષ્ટા મહોત્પાતા વૃદ્ધબાલગ્રહાશ્ચ યે ।
સર્વે નશ્યન્તુ તે વિષ્ણોર્નામગ્રહણભીરવઃ ॥ ૮॥

॥ ઇતિ શ્રીમદ્ભાગવતે દશમસ્કન્ધે ગોપીકૃતબાલરક્ષા સમાપ્તા ॥

Bhagavatapurana 10.06.21-29
Proofread by Dinesh Agarwal dinesh.garghouse at gmail.com, NA

was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*